# Mahaganapatistotram with Commentary shrIrAghavachaitanyavirachitam

# સવ્યાખ્યા મહાગણપતિસ્તોત્રં શ્રીરાઘવચૈતન્યવિરચિતમ્

## Document Information

Text title : Mahaganapati Stotram 1 with commentary

File name : mahagaNapatistotra.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : rAghavachaitanya

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Description-comments : Kavyamala 1

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

Mahaganapatistotram with Commentary
shrIrAghavachaitanyavirachitam

# સવ્યાખ્યા મહાગણપતિસ્તોત્રં શ્રીરાઘવચૈતન્યવિરચિતમ્

તચ્છિષ્યકૃતયા ટિપ્પણ્યા સમેતમ્ ।

યોગં યોગવિદાં વિધૂતવિવિધવ્યાસઙ્ગશુદ્ધાશય-
પ્રાદુર્ભૂતસુધારસપ્રસૃમરધ્યાનાસ્પદાધ્યાસિનામ્ ।
આનન્દપ્લવમાનબોધમધુરામોદચ્છટામેદુરં
તં ભૂમાનમુપાસ્મહે પરિણતં દન્તાવલસ્યાત્મના ॥ ૧॥

દન્તાવલો ગજસ્તસ્યેવાસ્યં મુખં યસ્ય સ ગજાનનસ્તદાત્મના તદ્રૂપેણ પરિણતં તં ભૂમાનં પરં બ્રહ્મોપાસ્મહે । કીદૃશં તમ્ । આનન્દો બ્રહ્માનન્દસ્તેન પ્લવમાનઃ । લક્ષણયા પૂર્ણાનન્દાભિન્ન ઇત્યર્થઃ । ઈદૃશો યો બોધસ્તેન ચિદાનન્દમયં સ્વરૂપમુક્તમ્ । તદ્વિવર્તરૂપઃ પ્રપઞ્ચ એવ મધુરામોદચ્છટાત્વેન રૂપિતસ્તેન મેદુરમ્ । પુનઃ કીદૃશમ્ । યોગવિદાં યોગમ્ । કીદૃશાં યોગવિદામ્ । વિધૂતો વિવિધો વ્યાસઙ્ગો યૈરત એવ શુદ્ધો ય આશયસ્તસ્મિન્પ્રાદુર્ભૂતઃ સુધારસઃ શાન્તિસુખં યેષાં તે ચ તે પ્રસૃમરં પ્રસારિ ધ્યાનં યસ્મિન્નીદૃશં યદાસ્પદં કંદરાદિ તદધ્યાસિનશ્ચ તેષામ્ ॥

તારશ્રીપરશક્તિકામવસુધારૂપાનુગાં યં વિદુ-
સ્તસ્મૈ સ્તાત્પ્રણતિર્ગણાધિપતયે યો રાગિણાભ્યર્થ્યતે ।
આમન્ત્ર્ય પ્રથમં વરેતિ વરદેત્યાર્તેન સર્વં જનં
સ્વામિન્મે વશમાનયેતિ સતતં સ્વાહાદિભિઃ પૂજિતઃ ॥ ૨॥

મહાગણપતિમન્ત્રમુદ્ધરતિ - તારઃ પ્રણવઃ, શ્રીર્લક્ષ્મીબીજમ્, પરશક્તિર્માયાબીજમ્, કામઃ કામબીજમ્, વસુધા ભૂમિબીજમ્, ઇતિ પઞ્ચરૂપાણાં બીજાનામનુ ગમિત્યક્ષરમેતાદૃશં યં સાધકા વિદુસ્તસ્મૈ ગણાધિપતયે પ્રણતિઃ સ્તાદિતિ યોજના । યઃ સતતં સ્વાહાસ્વધાદિભિઃ શક્તિભિઃ પૂજિતઃ । આર્તેન રાગિણા પ્રથમં વરેતિ તતો વરદેત્યામન્ત્ર્યાભ્યર્થ્યતે ।

અભ્યર્થનામેવાહ - સર્વં જનં સ્વામિન્મે વશમાનયેતિ । સ્વાહાદિભિરિત્યનેન સ્વાહાન્તો મન્ત્રઃ । અત્રાધિપદં સર્વમિતિ ચ પદં છન્દોનુરોધાદુક્તમ્ । મન્ત્રે તુ ગણપતયે તથા સર્વજનમિત્યેકમેવ પદમ્ । સ્વામિન્નિતિ ચ મન્ત્રાદ્બહિર્ભૂતમ્ ॥

કલ્લોલાઞ્ચલચુમ્બિતામ્બુદતતાવિક્ષુદ્રવામ્ભોનિધૌ
દ્વીપે રત્નમયે સુરદ્રુમવનામોદૈકમેદસ્વિનિ ।
મૂલે કલ્પતરોર્મહામણિમયે પીઠેઽક્ષરામ્ભોરુહે
ષટ્કોણાકલિતત્રિકોણરચનસત્કર્ણિકેઽમું ભજે ॥ ૩॥

કલ્લોલાનાં મહોર્મીણામઞ્ચલાઃ પ્રાન્તાસ્તૈરાશ્લિષ્ટા મેઘતતિર્યેનૈતાદૃશ ઇક્ષુરસસમુદ્રે સુરદ્રુમાણાં પારિજાતાદીનાં વનં તદામોદેન પરિપુષ્ટે । રત્નમયં દ્વીપં વારિમધ્યસ્થલં તદ્ગતસ્ય કલ્પતરોર્મૂલે મહામણિમયં પીઠં તત્ર ષટ્કોણયુક્તત્રિકોણકર્ણીકાયુક્તેઽક્ષરામ્ભોરુહે તન્ત્રપ્રસિદ્ધે માતૃકાકમલેઽમું મહાગણપતિં ભજે ॥

ચક્રપ્રાસરસાલકાર્મુકગદાસદ્બીજપૂરદ્વિજ-
વ્રીહ્યગ્રોત્પલપાશપઙ્કજકરં શુણ્ડાગ્રજાગ્રદ્ઘટમ્ ।
આશ્લિષ્ટં પ્રિયયા સરોજકરયા રત્નસ્ફુરદ્ભૂષયા
માણિક્યપ્રતિમં મહાગણપતિં વિશ્વેશમાશાસ્મહે ॥ ૪॥

ચક્રં પ્રસિદ્ધમ્, પ્રાસસ્ત્રિશૂલઃ, રસાલકાર્મુકમિક્ષુધનુઃ, ગદા પ્રસિદ્ધા, બીજપૂરો માતુલિઙ્ગમ્, દ્વિજઃ સ્વકીયો દન્તઃ, વ્રીહ્યગ્રં શાલિમઞ્જરી, ઉત્પલં પ્રસિદ્ધમ્, પાશપઙ્કજે ચ પ્રસિદ્ધે, એવં દશાયુધાનિ કરેષુ યસ્ય । શુણ્ડાગ્રે પુષ્કરે જાગ્રત્સ્થિતો ઘટો રત્નપૂર્ણો હેમકુમ્ભો યસ્ય । કમલહસ્તયા પ્રિયયા દક્ષિણહસ્તેનાલિઙ્ગિતં માણિક્યપ્રતિમં શોણચ્છવિં સર્વેશ્વરં મહાગણપતિમાશાસ્મહે ॥

દાનામ્ભઃપરિમેદુરપ્રસૃમરવ્યાલમ્બિરોલમ્બભૃ-
ત્સિન્દૂરારુણગણ્ડમણ્ડલયુગવ્યાજાત્પ્રશસ્તિદ્વયમ્ ।
ત્રૈલોક્યેષ્ટાવિધાનવર્ણસુભગં યઃ પદ્મરાગોપમં
ધત્તે સ શ્રિયમાતનોતુ સતતં દેવો ગણાનાં પતિઃ ॥ ૫॥

દાનામ્ભસા મદામ્બુના પરિમેદુરં વ્યાપ્તં પ્રસૃમરાન્વ્યાલમ્બિનો રોલમ્બાન્ભ્રમરાન્બિભર્તીતિ પ્રસૃમરવ્યાલમ્બિરોલમ્બભૃત્ । સિન્દૂરેણારુણમેતાદૃશં કુમ્ભપ્રદેશદ્વયં તસ્ય

મિષાત્ત્રૈલોક્યેષ્ટવિધાન્વર્ણસુભગં ત્રિભુવનશુભવિધ્યક્ષરમનોજ્ઞમ્ ।
પદ્મરાગોપમં પદ્મરાગો લોહિતકસ્તદુપમં પ્રશસ્તિદ્વયં યો ધત્તે સ
ગણાનાં પતિર્દેવઃ સતતં શ્રિયમાતનોતુ । યથા મૃદમ્બુલિપ્તે દારુફલકે
રક્તચૂર્ણં દત્ત્વાક્ષરાણિ, તથા દાનામ્બુલિપ્તે સિન્દૂરવતિ કુમ્ભસ્થલે
ભ્રમરા ઇત્યુક્તં ભવતિ ॥

ભ્રામ્યન્મન્દરઘૂર્ણનાપરવશક્ષીરાબ્ધિવીચિચ્છટા-
સચ્છાયાશ્ચલચામરવ્યતિકરશ્રીગર્વસર્વંકૃષાઃ ।
દિક્કાન્તાઘનસારચન્દનરસાસારાઃ શ્રયન્તાં મનઃ
સ્વચ્છન્દપ્રસરપ્રલિપ્તવિયતો હેરમ્બદન્તત્વિષઃ ॥ ૬॥

હેરમ્બદન્તત્વિષો મનઃ શ્રયન્તામ્ । કિંભૂતાઃ । ભ્રામ્યતો
મન્દરસ્ય ઘૂર્ણનાવૃત્તયસ્તદાયત્તસ્ય ક્ષીરાબ્ધેર્વીચયો
લહર્યસ્તાસાં છટા અગ્રભાગાસ્તૈઃ સદૃશાઃ । પુનઃ કીદૃશાઃ ।
ચલચામરવ્યતિકરશ્રીગર્વસર્વંકકૃષાઃ । વ્યતિકરો
વ્યતિષઙ્ગઃ । દિક્કાન્તેત્યાદિરૂપકમ્ । ઘનસારઃ કર્પૂરઃ । તથા
સ્વચ્છન્દપ્રસરપ્રલિપ્તવિયતોઽનલ્પસંચારાકીર્ણાકાશાઃ । એતેન  ત્વિષાં
બહુત્વં વ્યજ્યતે ॥

મુક્તાજાલકરમ્બિતપ્રવિકસન્માણિક્યપુઞ્જચ્છટા-
કાન્તાઃ કમ્બુકદમ્બચુમ્બિતઘનાભોગપ્રવાલોપમાઃ ।
જ્યોત્સ્નાપૂરતરઙ્ગમન્થરતરત્સંધ્યાવયસ્યાશ્ચિરં
હેરમ્બસ્ય જયન્તિ દન્તકિરણાકીર્ણાઃ શરીરત્વિષઃ ॥ ૭॥

મૌક્તિકસમૂહમિશ્રિતપ્રદીપ્તમાણિક્યસમૂહચ્છટાવત્કાન્તા મનોહરાઃ ।
શઙ્ખસમૂહસંગતવિસ્તીર્ણવિદ્રુમસમાઃ । જ્યોત્સ્નાપૂરતરઙ્ગે મન્થરં
તરન્તી ચાસૌ સંધ્યા ચ તસ્યા વયસ્યાઃ સામ્યાત્સખ્યઃ । એતાદૃશા હેરમ્બસ્ય
દન્તકિરણૈર્વ્યાપ્તાઃ શરીરત્વિષશ્ચિરં જયન્તિ ॥

શુણ્ડાગ્રાકલિતેન હેમકલશેનાવર્જિતેન ક્ષર-
ન્નાનારત્નચયેન સાધકજનાન્સંભાવયન્કોટિશઃ ।
દાનામોદવિનોદલુબ્ધમધુપપ્રોત્સારણાવિર્ભવ-
ત્કર્ણાન્દોલનખેલનો વિજયતે દેવો ગણગ્રામણીઃ ॥ ૮॥

શુણ્ડાપ્રધૃતસુવર્ણકલશસંગૃહીતેન ક્ષરતા
બહુત્વાદ્બહિરપિ નિર્ગચ્છતા મુક્તામાણિક્યાદિરત્નસમૂહેન કોટિશઃ

સાધકજનાન્સંભાવયન્નસંખ્યાતાનુપાસકાન્સમ્પદા વર્ધયન્ ।
દાનેત્યાદિ । આમોદો ગન્ધહર્ષયોઃ । પ્રોત્સારણમુચ્ચાટનં
તદર્થમાવિર્ભવત્કર્ણાન્દોલનક્રીડઃ । ગણાનામીશ્વરો દેવો વિજયતે ॥

હેરમ્બં પ્રણમામિ યસ્ય પુરતઃ શાણ્ડિલ્યમૂલે શ્રિયા
બિભ્રત્યામ્બુરુહે સમં મધુરિપુસ્તે શઙ્ખચક્રે વહન્ ।
ન્યગ્રોધસ્ય તલે સહાદ્રિસુતયા શંભુસ્તયા દક્ષિણે
બિભ્રાણઃ પરશું ત્રિશૂલમિતયા પાશાઙ્કુશાભ્યાં શુભમ્ ॥ ૯॥

શાણ્ડિલ્યમૂલે બિલ્વવૃક્ષસ્યાધો યસ્ય મહાગણપતેઃ પુરતોઽગ્રભાગે પદ્મે
બિભ્રત્યા શ્રિયા સમં તે પ્રસિદ્ધે શઙ્ખચક્રે વહન્મધુરિપુર્વિષ્ણુરસ્તિ ।
તથા યસ્ય દક્ષિણે ન્યગ્રોધસ્ય તલે વટવૃક્ષાધઃ પાશાઙ્કુશાભ્યામિતયા
સહિતયાદ્રિસુતયા પાર્વત્યા સહ પરશું ત્રિશૂલં ચ બિભ્રાણઃ શંભુઃ
શિવોઽસ્તિ ॥

પશ્ચાત્પિપ્પલમાશ્રિતો રતિપતિર્દેવસ્ય રત્યોત્પલે
બિભ્રત્યા સમમૈક્ષવં ધનુરિષૂન્પૌષ્પાન્વહન્પઞ્ચ ચ ।
વામે ચક્રગદાધરઃ સ ભગવાન્ક્રોડઃ પ્રિયંગોસ્તલે
હસ્તોદ્યચ્છુકશાલિમઞ્જરિકયા દેવ્યા ધરણ્યા સહ ॥ ૧૦॥

દેવસ્ય પશ્ચિમે પિપ્પલવૃક્ષસ્યાધ ઉત્પલે બિભ્રત્યા રત્યા સમમૈક્ષવં
ધનુઃ પઞ્ચ પૌષ્પાનિષૂંશ્ચ વહન્ રતિપતિઃ કામદેવોઽસ્તિ । અસ્ય ચ વામે
પ્રિયંગુવૃક્ષાધો હસ્તોદ્યચ્છુકશાલિમઞ્જરિકયૈકસ્મિન્કરે કીરમન્યત્ર
કલમકણિશં બિભ્રત્યા ધરણ્યા સહ સ પ્રસિદ્ધો ભગવાન્ક્રોડો વરાહોઽસ્તિ
તં હેરમ્બં પ્રણમામીતિ પૂર્વેણાન્વયઃ ॥

ષટ્કોણાશ્રિષુ ષટ્સુ ષડ્ ગજમુખાઃ પાશાઙ્કુશાભીવરા-
ન્બિભ્રાણાઃ પ્રમદાસખાઃ પૃથુમહાશોણાશ્મપુઞ્જત્વિષઃ ।
આમોદઃ પુરતઃ પ્રમોદસુમુખૌ તં ચાભિતો દુર્મુખઃ
પશ્ચાત્પાર્શ્વગતોઽસ્ય વિઘ્ન ઇતિ યો વિઘ્નકર્તેતિ ચ ॥ ૧૧॥

ષટ્કોણસ્ય પીઠસ્ય ષટ્સ્વશ્રિષુ પાલીષુ ષડ્ ગજમુખા ધ્યેયાઃ ।
કીદૃશાસ્તે । પાશાઙ્કુશાભયવરાન્હસ્તેષુ બિભ્રાણાઃ । પ્રમદાનાં સખાય
ઇતિ પ્રમદાસખાઃ । ભાર્યાસહિતા ઇત્યર્થઃ । પૃથુશ્ચાસૌ મહાશોણાશ્મનાં
પદ્મરાગાણાં પુઞ્જસ્તદ્વત્ત્વિટ્ કાન્તિર્યેષાં તે । યદિ 'પૃથુમહાઃ'
ઇતિ વિસર્ગાન્તઃ પાઠસ્તદા ભિન્નં પદમ્ । પૃથુર્મહો યેષાં તે ।

અકારાન્તોઽપિ મહશબ્દોઽસ્તિ । તેષાં નામાન્યાહ - પુરતોઽગ્રકોણ આમોદઃ । તં ચામોદમભિતઃ પ્રમોદસુમુખૌ । પુરઃ કલ્પિતપૂર્વદિગપેક્ષયાગ્નિકોણે પ્રમોદઃ, એવમીશાનકોણે સુમુખ ઇત્યર્થઃ । પશ્ચાત્પશ્ચિમકોણે દુર્મુખઃ । અસ્ય દુર્મુખસ્ય વિઘ્ન ઇતિ યસ્ય નામ સ એકસ્મિન્પાર્શ્વે વિઘ્નકર્તેતિ યસ્ય નામ સ દ્વિતીયપાર્શ્વેઽસ્તિ । અર્થાદેકો નૈરૃત્યકોણે, અપરો વાયવ્યે વર્તતે ॥

આમોદાદિગણેશ્વરપ્રિયતમાસ્તત્રૈવ નિત્યં સ્થિતાઃ
કાન્તાશ્લેષરસજ્ઞમન્થરદૃશઃ સિદ્ધિઃ સમૃદ્ધિસ્તતઃ ।
કાન્તિર્યા મદનાવતીત્યપિ તથા કલ્પેષુ યા ગીયતે
સાન્યા યાપિ મદદ્રવા તદપરા દ્રાવિણ્યમૂઃ પૂજિતાઃ ॥ ૧૨॥

કાન્તસ્ય સ્વસ્વભર્તુરાલિઙ્ગનરસં જાનન્ત્યત એવ મન્થરા રાગિણી દૃગ્યાસાં તાઃ । આમોદાદીનાં પૂર્વશ્લોકોક્તાનાં ષણ્ણાં ભાર્યાસ્તેષાં સમીપે સ્થિતા ધ્યેયાઃ । તાસાં નામાનિ ચ - સિદ્ધિઃ, સમૃદ્ધિઃ, કાન્તિઃ, મદનાવતી, મદદ્રવા, દ્રાવિણી ચેતિ ॥

આશ્લિષ્ટૌ વસુધેત્યથો વસુમતી તાભ્યાં સિતાલોહિતૌ
વર્ષન્તૌ વસુ પાર્શ્વયોર્વિલસતસ્તૌ શઙ્ખપદ્મૌ નિધી ।
અઙ્ગાન્યન્વથ માતરશ્ચ પરિતઃ શક્રાદયોઽબ્જાશ્રયા-
સ્તદ્બાહ્યે કુલિશાદયઃ પરિપતત્કાલાનલજ્યોતિષઃ ॥ ૧૩॥

વસુધયા વસુમત્યા ચ ક્રમેણાલિઙ્ગિતૌ શુક્લરક્તવર્ણૌ ધનં વર્ષન્તૌ તૌ શઙ્ખપદ્મસંજ્ઞૌ પ્રસિદ્ધૌ નિધી ષટ્કોણપાર્શ્વયોર્વિલસતઃ । તયોર્ધ્યાનં કુર્યાદિત્યર્થહ । અનુ નિધિધ્યાનાનન્તરં હૃદયાનિ ષડઙ્ગાનિ ધ્યાયેત્ । પરિતો બ્રાહ્મ્યાદ્યા અષ્ટ માતરો ધ્યેયાઃ । ષટ્કોણાદ્બહિઃસ્થિતેઽષ્ટદલકમલ ઇન્દ્રાદયો દિક્પાલાસ્તદ્બાહ્યે તેષાં સમીપ એવ પરિપતત્કાલાનલજ્યોતિષઃ પ્રદીપ્તસ્વરૂપા ઇન્દ્રાદીનાં હેતયો વજ્રાદ્યા ધ્યેયાઃ ॥

ઇત્થં વિષ્ણુશિવાદિતત્ત્વતનવે શ્રીવક્રતુણ્ડાય હું-
કારાક્ષિપ્તસમસ્તદૈત્યપૃતનાવ્રાતાય દીપ્તત્વિષે ।
આનન્દૈકરસાવબોધલહરીવિધ્વસ્તસર્વોર્મયે
સર્વત્ર પ્રથમાનમુગ્ધમહસે તસ્મૈ પરસ્મૈ નમઃ ॥ ૧૪॥

'હેરમ્બં પ્રણમામિ' (૯।૧૦) ઇતિ શ્લોકાભ્યાં

વિષ્ણુશિવાદિસ્વરૂપૈસ્તનુર્મૂર્તિર્યસ્ય સ તસ્મૈ । આદિપદાત્સ્મરક્રોડૌ ।
હુંકારમાત્રેણ નિરસ્તસમસ્તાસુરસૈન્યસમૂહાય દીપ્તકાન્તયે । આનન્દેતિ ।
નિરતિશયસુખસ્ફુરણતરઙ્ગૈર્દૂરીકૃતસમ્પૂર્ણોર્મયે । ઊર્મયઃ
ષડ્ભાવવિકારાઃ । તે ચ - જાયતે, અસ્તિ, વર્ધતે, વિપરિણમતે,
અપક્ષીયતે, નશ્યતીતિ ચ । આનન્દૈકરસાવયોધલહરીભિર્વિધ્વસ્તાઃ
સર્વેષાં સાધકાનામૂર્મયઃ ષડિન્દ્રિયજન્યા વૃત્તયો યસ્માદિત્યેકે ।
ઊર્મિશબ્દેનાવિદ્યાદયો યોગશાસ્ત્રપ્રસિદ્ધાઃ ક્લેશાઃ । સર્વત્ર પ્રથમાનં
મુગ્ધં સુન્દરં મહો યસ્ય તસ્મૈ પરસ્મૈ જગતોઽન્યસ્મૈ નમઃ ॥

સેવાહેવાકિદેવાસુરનરનિકરસ્ફારકોટીરકોટી-
કોટિવ્યાટીકમાનદ્યુમણિસમમણિશ્રેણિભાવેણિકાનામ્ ।
રાજન્નીરાજનશ્રીસખચરણનખદ્યોતવિદ્યોતમાનઃ
શ્રેયઃ સ્થેયઃ સ દેયાન્મમ વિમલદૃશો બન્ધુરં સિન્ધુરાસ્યઃ ॥ ૧૫॥

સેવાયાં હેવાકોઽભિલાષો યેષામ્ । અહમગ્રેઽહમગ્રે ભવામીતીચ્છા ।
અહંપૂર્વિકેતિ યાવત્ । તે ચ તે દેવાસુરનરાણાં સમૂહાસ્તેષાં
દેદીપ્યમાનમુકુટાગ્રાણાં યા કોટિઃ સંખ્યાવિશેષસ્તત્ર વ્યાટીકમાનાઃ સુસંગતાઃ
સૂર્યતુલ્યરત્નપઙ્ક્તિકાન્તિપ્રવાહાસ્તેષામ્ । રાજન્તી નીરાજનશ્રીરારાત્રિકશોભા
તસ્યાઃ સખાયસ્તે ચ તે ચરણનખાશ્ચ તેષાં દ્યોતેન પ્રકાશેન
વિદ્યોતમાનઃ સ પ્રસિદ્ધઃ સિન્ધુરાસ્યો ગજમુખઃ । હે વિમલદૃશઃ
પણ્ડિતાઃ । મમ બન્ધુરં રમ્યં સ્થેયઃ સ્થિરતરં શ્રેયઃ કલ્યાણં દેયાત્ ।
મમેત્યસ્ય વા વિમલદૃશ ઇતિ વિશેષણમ્ । 'વિમલદૃશા' ઇતિ પાઠે તુ
સૌમ્યાવલોકનેન શ્રેયો દદ્યાદિત્યર્થઃ ॥

એતેન પ્રકટરહસ્યમન્ત્રમાલાગર્ભેણ સ્ફુટતરસંવિદા સ્તવેન ।
યઃ સ્તૌતિ પ્રચુરતરં મહાગણેશં તસ્યેયં ભવતિ વશંવદા ત્રિલોકી
॥ ૧૬॥

સ્ફુટતરસંવિદેત્યનેન સ્તોત્રે પ્રસાદગુણઃ સૂચિતઃ । પ્રચુરતરઃ
મુહુર્મુહુઃ । અન્યત્સ્પષ્ટમ્ ॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યવર્યશ્રીરાઘવચૈતન્યવિરચિતં
મહાગણપતિસ્તોત્રં તચ્છિષ્યકૃતયા ટિપ્પણ્યા સમેતં સમાપ્તમ્ ।

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*Mahaganapatistotram with Commentary shrIrAghavachaitanyavirachitam*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*